श्रीः । श्रीमते लक्ष्मीहयवदनपरब्रह्मणे नमः ।

श्रीमते श्रीवण्शठकोप श्रीवेदान्तदेशिक यतीन्द्रमहादेशिकाय नमः ।

# तत्त्वदर्पणस्य भूमिका

वेदान्तदेशिकान् वन्दे यतीन्द्रांश्च कुटुम्बिनः । अहोबिलमठाधीशान् तदास्थानबुधान् क्रमात् ॥

बुधचक्रवर्तिकृतसूक्तिगुम्फसत्पठितृप्रबुद्धजनतुष्टिलिप्सया ।
यततो ममात्र रचनेऽस्य भूमिकां क्षमयानुगृह्य दयतां नृकेसरी ॥

सुनिषादराजकृतरामसद्गुणप्रथनं तु भक्तभरतस्य संनिधौ ।
तुलयत्यथात्र मम साहसं यतो न मृषा किलाल्पधिषणस्य न त्रपा ॥

विदाङ्कुर्वन्तु तत्र भवन्तो विद्वांसो यदत्र अखिलजगद्भासकस्य दिवाकरस्य दीपार्चनाय प्रक्रमतेऽयं जनः इति । 'गङ्गासङ्गेन नैर्मल्यं रथ्याद्भिः लभ्यते यदि । वाचो विशुद्धिसिध्यर्थं सङ्गम्यन्ते गुरोः गिरः ॥' इत्यभियुक्तोदितवत् समस्तविद्वज्जनविदितविविधविद्यावैदुष्यानां श्रीमदहोबिलमठास्थानविदुषां श्रीचक्रवर्त्याचार्याणां प्रत्यगात्मप्रत्यक्त्वस्य धर्मिभास्यत्वम् - आत्मभास्यत्वम् - आत्मनैव भासयन्ती कृतिः अत्रावतार्यत इत्येवायं संरम्भः । यदि विद्वज्जन-मात्रावगाह्यविषयविचारेषु विद्वज्जनानप्यवधीरयत्सु वा विद्वांस एव प्रवर्तेरन्, तर्हि अविदुषां विद्वद्ग्रन्थप्राप्तिरप्यलभ्येति शोचतानेनाविदुषा तत्र 'संबन्धतोऽपि विबुधैः कृतवाग्विहारैः अध्यात्मसीमनि समं त्वपुनर्भवाय । कल्पेत वन्यतरु-कल्पसुवित्तिशून्योऽप्याहुर्निदर्शनमथात्र पलाशकं हि ॥' इत्यालोच्य प्रवृत्तिरियमास्थिता ।

प्रकृते तावत् कवितार्किकसिंहानां सर्वतन्त्रस्वतन्त्राणां श्रीमद्वेङ्कटनाथार्याणां श्रीमद्रहस्यत्रयसारे तत्त्वत्रयचिन्तनाधिकारे धर्मधर्मिज्ञानस्वरूपवैलक्षण्यप्रदर्शनप्रकरणस्थश्रीसूक्तिविशेषव्याख्यानावसरे सारास्वादिनी-सारबोधिनीव्याख्यात्रोः अभिप्रायभेदमवलम्ब्य प्रवृत्तवादग्रन्थसरणौ षष्ठोऽयं ग्रन्थः धर्मिभास्यत्वसमर्थननामकः प्रकाश्यते । अयमत्र सर्वैरविशेषमामोद्यते यत् ईदृशवादग्रन्थकुशलिनां कोलाहलिनां च दुर्भिक्षे कलिकालेऽस्मिन् एते ग्रन्थाः बहूनां नोपकुर्युः । उपकारोपीदृशैः किंरूपः कृतः स्यात् विदुषामपीति विवादार्ह एव । अन्यदप्यत्र न विस्मर्तव्यं यत् 'अभिनिवेशवशीकृतचेतसां बहुविदामपि संभवति भ्रमः' इति परमाचार्योक्तरीत्या प्रवर्धमाने वादाहवे वीतरागकथात्वस्याभिभवः अभिनिवेशस्य रूढिमा तेन प्रयुज्यमानवाच्येषु संयमच्युतिश्च दुर्वारा एवेति । अतः अनेनापि ग्रन्थेनासौ विषयः समाप्येतेत्याशास्यते । सम्यगुक्तं च द्वितीयेऽस्मिन् वादसरणिग्रन्थे श्रीरङ्गशठजिद्योगिछात्रश्रेणीमुख्यैः सत्त्वेन अन्यथा वा अस्मिन् विषये ज्ञानवैशद्यस्य आगामि मोक्षफलं मात्रयापि न हीयेतेति ।

अतो बुद्धिपूर्वमेवात्र ग्रन्थे विषयपरामर्शपुरस्सरं तद्वैलक्षण्यावेदनम् - अज्ञानाशक्तितश्च न प्रयत्यते । तर्हि किं शक्यं त्वयेति चेत् इयदेव यत् वक्तृवैलक्षण्यमात्रावेदनं - तच्च गुरुस्तवनरूपमेव भवति । तदित्थं -

त्रय्यन्तार्थान् सुगूढान् सरलविशदवाग्गुम्फपूरैः सलीलं वाक्यैर्भाषामयैश्च स्वरसवितरणाद् बालभावे स्थितान्नः ।
सारं मन्त्रत्रयस्य स्फुटमवगमयन् आन्तराज्ञानशान्त्यै दीपं वेदान्तवाचामपि य उदहरत् चक्रवर्त्यार्य ईड्यः ॥

तस्मै निस्सीमभूम्ने निरवधिकरुणाबोधचारित्रसीम्ने भूयोभूयः प्रणत्या वयमिह विरतप्रत्युपस्कारयत्नाः ।
साक्षान्नारायणं तं बुधवरवपुषाऽवस्थितं नः समक्षं सार्थीकुर्मो जनिं स्वाम् अतुलमुदयुजा वाङ्मनोगात्रकेण ॥

न्याये वेदान्ततन्त्रे विबुधवरमथ ब्रह्मविद्यागुरुन्तम् सारज्ञं सारशास्त्रे प्रवचननिपुणं धूर्वहं सम्प्रदाये ।
वर्षन्तं रामगाथामृतमथ शुकवाक्सत्सुधास्वादशीलं गोदाश्रीसूक्तिसिंहं गरुडगिरिमठास्थानविद्वांसमीडे ॥

इमं वाचिकापचारं ब्रह्मविदः विद्वांसः दयया क्षमन्ताम् इति सविनयं प्रार्थयति ।

विभव-मेष-शुक्ल-दशमी-मङ्गलवासरे कल्याणपुर्याम्

विद्वज्जनवशंवदः शोकहर्तृपुराभिजनः रामानुजदासः

1-2-1988